## २५. नूतना लेखनी

किं कति
कुतः किमर्थम्

राकेशः - किं भोः, नूतना लेखनी वा ? कुतः आनीतवान् ?

श्रीशः - मम अग्रजः 'न्यूयार्कतः' आनीतवान् ।

राकेशः - वेङ्कटेशः आगतवान् आसीत् किम् ? भवान् किमर्थं तं मम गृहं न आनीतवान् ?

श्रीशः - तस्य समयः एव नास्ति भोः । सः श्वः प्रातः गमिष्यति ।

राकेशः - भवान् ह्यः किमर्थं विद्यालयं न आगतवान् ?

श्रीशः - ह्यः आवां द्वौ अपि नगरं गतवन्तौ। ततः बहूनि वस्तूनि आनीतवन्तौ । पश्यतु, एषा पेटिका अपि नूतना।

राकेशः - बहु सम्यक् अस्ति । एतस्याः कति रूप्यकाणि ?

श्रीशः - प्रायः ६५ रूप्यकाणि दत्तवान् इति चिन्तयामि ।

राकेशः - श्वः मम गृहं प्रति लखनऊतः बान्धवाः आगमिष्यन्ति । एकः विवाहः अस्ति । तत्र सर्वे गच्छन्ति ।

श्रीशः - तर्हि श्वः भवान् विद्यालयं नागमिष्यति ननु ?

राकेशः - अहं विवाहे न गच्छामि। लेखनं बहु अस्ति । अतः गृहे एव भविष्यामि । नूतनया लेखन्या लेखिष्यामि ।